# Devakali Ashtakam Devakali Mahima Stotram

# देवकाल्यष्टकम् अथवा देवकालीमहिमा स्तोत्रम्

## Document Information

Text title : devakAlyaShTakam

File name : devakAlyaShTakam.itx

Category : devii, aShTaka, devI, dashamahAvidyA

Location : doc_devii

Author : Durgaprasad DvivedI

Transliterated by : Rajani Arjun Shankar

Proofread by : Rajani Arjun Shankar

Latest update : October 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 9, 2022

*sanskritdocuments.org*

# देवकाल्यष्टकम् अथवा देवकालीमहिमा स्तोत्रम्

ते देवकालि ! कलिकर्म विनाशयन्ति
वन्दारु-संहतिषु शर्म विकाशयन्ति ।
ज्ञानामृतानि हृदये परिवाहयन्ति
ये तावकीन-पदपङ्कजमर्चयन्ति ॥ १॥

ते देवकालि ! कुल-कीर्तिमुदञ्चयन्ति
दिक्षु प्रताप-पटलीमवतंसयन्ति ।
विद्या-परिष्कृति-चणानपि मूकयन्ति
येऽन्तः सदैव भवतीमधिवासयन्ति ॥ २॥

ते देवकालि ! भुवनानि वशं नयन्ति
शिष्टिं नृपेन्द्र-मुकुटेषु निवेशयन्ति ।
दुःखान्धकार-पटलानि विपाटयन्ति
ये त्वामुदार-करुणामसृणां श्रयन्ति ॥ ३॥

ते देवकालि ! कवितामृतमूर्जयन्ति
संसत्सु वाद-निपुणानपि तर्जयन्ति ।
कामादि-कर्कश-रिपु-प्रकराञ्जयन्ति
ये तावक स्मरण-सौभगमार्जयन्ति ॥ ४॥

ते देवकालि ! कलिसम्पदमर्दयन्ति
दुर्वासनान्ध-तमसानि विमर्दयन्ति ।
सौभाग्य-सारिणि ! जगन्ति पवित्रयन्ति
ये श्रीमतीं हृदय-वेश्मनि चित्रयन्ति ॥ ५॥

ते देवकालि ! सुख-सूक्तिमदभ्रयन्ति
विद्या-कलाप-कृषि-मण्डलमभ्रयन्ति ।
देशान्तरेषु चरितानि विशेषयन्ति
ये शर्म-धाम तव नाम निरूपयन्ति ॥ ६॥

ते  देवकालि ! कुकृतानि निकृन्तयन्ति
    संसार-दुःख-निगडानि विभञ्जयन्ति  ।
शान्तिं परामधिमनः परिचारयन्ति
    ये तवत्कथामृत-रसान् सततं धयन्ति ॥ ७॥

ते नूत्नेन्दीवराभे ! भवभय-जलधिं शीघ्रमुल्लङ्घयन्ति
    प्रध्मातस्वर्णवर्णे ! निखिल-सुख-कलोल्लासमासादयन्ति ।
फुल्लन्-मल्ली-मतल्ली-प्रतिभट-सुषमे ! हर्षमुत्कर्षयन्ति
    श्रीमातः ! सततं ये तव भजनविधौ चित्तमायोजयन्ति ॥ ८॥

अयोध्या-प्रान्त-वासिन्याः सुदर्शन-कृतस्थितेः ।
देवकाल्याः स्तोत्रमेतत् पठतां घटतां शिवम् ॥ ९॥

इति श्रीदुर्गाप्रसादद्विवेदीविरचितं देवकाल्यष्टकम् अथवा देवकालीमहिमा स्तोत्रं सम्पूर्णम् ।

Encoded and proofread by Rajani Arjun Shankar

*Devakali Ashtakam Devakali Mahima Stotram*

pdf was typeset on July 9, 2022

Please send corrections to *sanskrit@cheerful.com*